# Ribhuproktah Tanmayabhavopadeshah

# ઋભુપ્રોક્તઃ તન્મયભાવોપદેશઃ

## Document Information

Text title : Ribhuproktah Tanmayabhavopadeshah

File name : RRibhuproktaHtanmayabhAvopadeshaH.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 29| 2-63||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તઃ તન્મયભાવોપદેશઃ

(તન્મયો ભવ સર્વદા)

યઃ પરં બ્રહ્મ સર્વાત્મા સચ્ચિદાનન્દવિગ્રહઃ ।
સર્વાત્મા પરમાત્મા હિ તન્મયો ભવ સર્વદા ॥ ૨૯.૨॥

આત્મરૂપમિદં સર્વમાદ્યન્તરહિતોઽજયઃ ।
કાર્યાકાર્યમિદં નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૩॥

યત્ર દ્વૈતભયં નાસ્તિ યત્રાદ્વૈતપ્રબોધનમ્ ।
શાન્તાશાન્તદ્વયં નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૪॥

યત્ર સઙ્કલ્પકં નાસ્તિ યત્ર ભ્રાન્તિર્ન વિદ્યતે ।
તદેવ હિ મતિર્નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૫॥

યત્ર બ્રહ્મણિ નાસ્ત્યેવ યત્ર ભાવિ વિકલ્પનમ્ ।
યત્ર સર્વં જગન્નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૬॥

યત્ર ભાવમભાવં વા મનોભ્રાન્તિ વિકલ્પનમ્ ।
યત્ર ભ્રાન્તેર્ન વાર્તા વા તન્મયો ભવ સર્વદા ॥ ૨૯.૭॥

(યત્ર વાર્તા ન વાર્તા વા તન્મયો ભવ સર્વદા) ॥ ૨૯.૭॥

યત્ર નાસ્તિ સુખં નાસ્તિ દેહોઽહમિતિ રૂપકમ્ ।
સર્વસઙ્કલ્પનિર્મુક્તં તન્મયો ભવ સર્વદા ॥ ૨૯.૮॥

યત્ર બ્રહ્મ વિના ભાવો યત્ર દોષો ન વિદ્યતે ।
યત્ર દ્વન્દ્વભયં નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૯॥

યત્ર વાક્કાયકાર્યં વા યત્ર કલ્પો લયં ગતઃ ।
યત્ર પ્રપઞ્ચં નોત્પન્નં તન્મયો ભવ સર્વદા ॥ ૨૯.૧૦॥

યત્ર માયા પ્રકાશો ન માયા કાર્યં ન કિઞ્ચન ।
યત્ર દૃશ્યમદૃશ્યં વા તન્મયો ભવ સર્વદા ॥ ૨૯.૧૧॥

વિદ્વાન્વિદ્યાપિ નાસ્ત્યેવ યત્ર પક્ષવિપક્ષકૌ ।
ન યત્ર દોષાદોષૌ વા તન્મયો ભવ સર્વદા ॥ ૨૯.૧૨॥

યત્ર વિષ્ણુત્વભેદો ન યત્ર બ્રહ્મા ન વિદ્યતે ।
યત્ર શઙ્કરભેદો ન તન્મયો ભવ સર્વદા ॥ ૨૯.૧૩॥

ન યત્ર સદસદ્ભેદો ન યત્ર કલનાપદમ્ ।
ન યત્ર જીવકલના તન્મયો ભવ સર્વદા ॥ ૨૯.૧૪॥

ન યત્ર શઙ્કરધ્યાનં ન યત્ર પરમં પદમ્ ।
ન યત્ર કલનાકારં તન્મયો ભવ સર્વદા ॥ ૨૯.૧૫॥

ન યત્રાણુર્મહત્ત્વં ચ યત્ર સન્તોષકલ્પનમ્ ।
યત્ર પ્રપઞ્ચમાભાસં તન્મયો ભવ સર્વદા ॥ ૨૯.૧૬॥

ન યત્ર દેહકલનં ન યત્ર હિ કુતૂહલમ્ ।
ન યત્ર ચિત્તકલનં તન્મયો ભવ સર્વદા ॥ ૨૯.૧૭॥

ન યત્ર બુદ્ધિવિજ્ઞાનં ન યત્રાત્મા મનોમયઃ ।
ન યત્ર કામકલનં તન્મયો ભવ સર્વદા ॥ ૨૯.૧૮॥

ન યત્ર મોક્ષવિશ્રાન્તિર્યત્ર બન્ધત્વવિ(નિ)ગ્રહઃ ।
ન યત્ર શાશ્વતં જ્ઞાનં તન્મયો ભવ સર્વદા ॥ ૨૯.૧૯॥

ન યત્ર કાલકલનં યત્ર દુઃખત્વભાવનમ્ ।
ન યત્ર દેહકલનં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૦॥

ન યત્ર જીવવૈરાગ્યં યત્ર શાસ્ત્રવિકલ્પનમ્ ।
યત્રાહમહમાત્મત્વં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૧॥

ન યત્ર જીવન્મુક્તિર્વા યત્ર દેહવિમોચનમ્ ।
યત્ર સઙ્કલ્પિતં કાર્યં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૨॥

ન યત્ર ભૂતકલનં યત્રાન્યત્વપ્રભાવનમ્ ।
ન યત્ર જીવભેદો વા તન્મયો ભવ સર્વદા ॥ ૨૯.૨૩॥

યત્રાનન્દપદં બ્રહ્મ યત્રાનન્દપદં સુખમ્ ।
યત્રાનન્દગુણં નિત્યં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૪॥

ન યત્ર વસ્તુપ્રભવં ન યત્રાપજયોજયઃ ।
ન યત્ર વાક્યકથનં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૫॥

ન યત્રાત્મવિચારાઙ્ગં ન યત્ર શ્રવણાકુલમ્ ।
ન યત્ર ચ મહાનન્દં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૬॥

ન યત્ર હિ સજાતીયં વિજાતીયં ન યત્ર હિ ।
ન યત્ર સ્વગતં ભેદં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૭॥

ન યત્ર નરકો ઘોરો ન યત્ર સ્વર્ગસમ્પદઃ ।
ન યત્ર બ્રહ્મલોકો વા તન્મયો ભવ સર્વદા ॥ ૨૯.૨૮॥

ન યત્ર વિષ્ણુસાયુજ્યં યત્ર કૈલાસપર્વતઃ ।
બ્રહ્માણ્ડમણ્ડલં યત્ર તન્મયો ભવ સર્વદા ॥ ૨૯.૨૯॥

ન યત્ર ભૂષણં યત્ર દૂષણં વા ન વિદ્યતે ।
ન યત્ર સમતા દોષં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૦॥

ન યત્ર મનસા ભાવો ન યત્ર સવિકલ્પનમ્ ।
ન યત્રાનુભવં દુઃખં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૧॥

યત્ર પાપભયં નાસ્તિ પઞ્ચપાપાદપિ ક્વચિત્ ।
ન યત્ર સઙ્ગદોષં વા તન્મયો ભવ સર્વદા ॥ ૨૯.૩૨॥

યત્ર તાપત્રયં નાસ્તિ યત્ર જીવત્રયં ક્વચિત્ ।
યત્ર વિશ્વવિકલ્પાખ્યં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૩॥

ન યત્ર બોધમુત્પન્નં ન યત્ર જગતાં ભ્રમઃ ।
ન યત્ર કરણાકારં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૪॥

ન યત્ર હિ મનો રાજ્યં યત્રૈવ પરમં સુખમ્ ।
યત્ર વૈ શાશ્વતં સ્થાનં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૫॥

યત્ર વૈ કારણં શાન્તં યત્રૈવ સકલં સુખમ્ ।
યદ્ગત્વા ન નિવર્તન્તે તન્મયો ભવ સર્વદા ॥ ૨૯.૩૬॥

યજ્જ્ઞાત્વા મુચ્યતે સર્વં યજ્જ્ઞાત્વાઽન્યન્ન વિદ્યતે ।
યજ્જ્ઞાત્વા નાન્યવિજ્ઞાનં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૭॥

યત્રૈવ દોષં નોત્પન્નં યત્રૈવ સ્થાનનિશ્ચલઃ ।
યત્રૈવ જીવસઙ્ઘાતઃ તન્મયો ભવ સર્વદા ॥ ૨૯.૩૮॥

યત્રૈવ નિત્યતૃપ્તાત્મા યત્રૈવાનન્દનિશ્ચલમ્ ।

યત્રૈવ નિશ્ચલં શાન્તં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૯॥

યત્રૈવ સર્વસૌખ્યં વા યત્રૈવ સન્નિરૂપણમ્ ।
યત્રૈવ નિશ્ચયાકારં તન્મયો ભવ સર્વદા ॥ ૨૯.૪૦॥

ન યત્રાહં ન યત્ર ત્વં ન યત્ર ત્વં સ્વયં સ્વયમ્ ।
યત્રૈવ નિશ્ચયં શાન્તં તન્મયો ભવ સર્વદા ॥ ૨૯.૪૧॥

યત્રૈવ મોદતે નિત્યં યત્રૈવ સુખમેધતે ।
યત્ર દુઃખભયન્નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૪૨॥

યત્રૈવ ચિન્મયાકારં યત્રૈવાનન્દસાગરઃ ।
યત્રૈવ પરમં સાક્ષાત્તન્મયો ભવ સર્વદા ॥ ૨૯.૪૩॥

યત્રૈવ સ્વયમેવાત્ર સ્વયમેવ તદેવ હિ ।
સ્વસ્વાત્મનોક્તભેદોઽસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૪૪॥

યત્રૈવ પરમાનન્દં સ્વયમેવ સુખં પરમ્ ।
યત્રૈવાભેદકલનં તન્મયો ભવ સર્વદા ॥ ૨૯.૪૫॥

ન યત્ર ચાણુમાત્રં વા ન યત્ર મનસો મલમ્ ।
ન યત્ર ચ દદામ્યેવ તન્મયો ભવ સર્વદા ॥ ૨૯.૪૬॥

યત્ર ચિત્તં મૃતં દેહં મનો મરણમાત્મનઃ ।
યત્ર સ્મૃતિર્લયં યાતિ તન્મયો ભવ સર્વદા ॥ ૨૯.૪૭॥

યત્રૈવાહં મૃતો નૂનં યત્ર કામો લયં ગતઃ ।
યત્રૈવ પરમાનન્દં તન્મયો ભવ સર્વદા ॥ ૨૯.૪૮॥

યત્ર દેવાસ્ત્રયો લીનં યત્ર દેહાદયો મૃતાઃ ।
ન યત્ર વ્યવહારોઽસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૪૯॥

યત્ર મગ્નો નિરાયાસો યત્ર મગ્નો ન પશ્યતિ ।
યત્ર મગ્નો ન જન્માદિસ્તન્મયો ભવ સર્વદા ॥ ૨૯.૫૦॥

યત્ર મગ્નો ન ચાભાતિ યત્ર જાગ્રન્ન વિદ્યતે ।
યત્રૈવ મોહમરણં તન્મયો ભવ સર્વદા ॥ ૨૯.૫૧॥

યત્રૈવ કાલમરણં યત્ર યોગો લયં ગતઃ ।
યત્ર સત્સઙ્ગતિર્નષ્ટા તન્મયો ભવ સર્વદા ॥ ૨૯.૫૨॥

(additional shloka)

—

યત્ર વિદ્યાતિમરણં યત્ર વિશ્વં લયં ગતમ્ ।
યત્ર ભ્રાન્તિ નિવૃત્તત્વં તન્મયો ભવ સર્વદા ॥

યત્ર પ્રાણદયો નષ્ટા યત્ર દેહાસ્રયો મૃતાઃ ।
યત્ર માનાવમાનં ન તન્મયો ભવ સર્વદા ॥

—

યત્રૈવ બ્રહ્મણો રૂપં યત્રૈવાનન્દમાત્રકમ્ ।
યત્રૈવ પરમાનન્દં તન્મયો ભવ સર્વદા ॥ ૨૯.૫૩ ॥

યત્ર વિશ્વં ક્વચિન્નાસ્તિ યત્ર નાસ્તિ તતો જગત્ ।
યત્રાન્તઃકરણં નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૫૪ ॥

યત્રૈવ સુખમાત્રં ચ યત્રૈવાનન્દમાત્રકમ્ ।
યત્રૈવ પરમાનન્દં તન્મયો ભવ સર્વદા ॥ ૨૯.૫૫ ॥

યત્ર સન્માત્રચૈતન્યં યત્ર ચિન્માત્રમાત્રકમ્ ।
યત્રાનન્દમયં ભાતિ તન્મયો ભવ સર્વદા ॥ ૨૯.૫૬ ॥

યત્ર સાક્ષાત્પરં બ્રહ્મ યત્ર સાક્ષાત્સ્વયં પરમ્ ।
યત્ર શાન્તં પરં લક્ષ્યં તન્મયો ભવ સર્વદા ॥ ૨૯.૫૭ ॥

યત્ર સાક્ષાદખણ્ડાર્થં યત્ર સાક્ષાત્પરાયણમ્ ।
યત્ર નાશાદિકં નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૫૮ ॥

યત્ર સાક્ષાત્સ્વયં માત્રં યત્ર સાક્ષાત્સ્વયં જયમ્ ।
યત્ર સાક્ષાન્મહાનાત્મા તન્મયો ભવ સર્વદા ॥ ૨૯.૫૯ ॥

યત્ર સાક્ષાત્પરં તત્ત્વં યત્ર સાક્ષાત્સ્વયં મહત્ ।
યત્ર સાક્ષાત્તુ વિજ્ઞાનં તન્મયો ભવ સર્વદા ॥ ૨૯.૬૦ ॥

યત્ર સાક્ષાદ્ગુણાતીતં યત્ર સાક્ષાદ્ધિ નિર્મલમ્ ।
યત્ર સાક્ષાત્સદાશુદ્ધં તન્મયો ભવ સર્વદા ॥ ૨૯.૬૧ ॥

યત્ર સાક્ષાન્મહાનાત્મા યત્ર સાક્ષાત્સુખાત્સુખમ્ ।
યત્રૈવ જ્ઞાનવિજ્ઞાનં તન્મયો ભવ સર્વદા ॥ ૨૯.૬૨ ॥

યત્રૈવ હિ સ્વયં જ્યોતિર્યત્રૈવ સ્વયમદ્વયમ્ ।

યત્રૈવ પરમાનન્દં તન્મયો ભવ સર્વદા ॥ ૨૯.૬૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તઃ તન્મયભાવોપદેશઃ સમ્પૂર્ણઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૨૯। ૨-૬૩॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 29. 2-63..

Notes :

Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita. Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

---

*Ribhuproktah Tanmayabhavopadeshah*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*